नमो नमो निम्मल देसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

२६ महाप्रत्याख्यान-प्रकिर्णकसूत्रं

सव्वायं

(तृतीयं प्रकिर्णकम्)

(मूलसूत्रम् + संस्कृतछाया)

मू. (१) *एस करेमि पमाणं तित्थयराणं अनुत्तरगईणं ।*
सव्वेसिं च जिणाणं सिद्धाणं संजयाणं च ॥

छा. एष करोमि प्रमाणं तीर्थकरेभ्योऽनुत्तरगतिभ्यः ।
सर्वेभ्यश्च जिनेभ्यः सिद्धेभ्यः संयतेभ्यश्च ॥

मू. (२) *सव्वदुक्खप्पहीणाणं, सिद्धाणं अरहओ नमो ।*
सद्दहे जिनपन्नत्तं, पच्चक्खामि य पावगं ॥

छा. प्रक्षीणसर्वदुःखेभ्यः सिद्धेभ्योऽर्हभ्यो नमः ।
श्रद्दधे जिनप्रज्ञप्तं प्रत्याख्यामि च पापकम् ॥

मू. (३) *जं किंचिवि दुच्चरियं तमहं निंदामि सव्वभावेणं ।*
सामाइयं च तिविहं करेमि सव्वं निरागारं ॥

छा. यत्किञ्चिद् दुश्चरितं तदहं निन्दामि सर्वभावेन ।
सामायिकं च त्रिविधं करोमि निराकारम् ॥

मू. (४) *बाहिरब्भंतरं उवहिं, सरीरादि सभोअणं ।*
मणसा वयकाएणं, सव्वं तिविहेण वोसिरे ॥

छा. बाह्यमभ्यन्तरमुपधिं शरीरादि सभोजनम् ।
मनोवाक्कायेन सर्वं त्रिविधेन व्युत्सृजामि ॥

मू. (५) *रागबंधं पओसं च, हरिसं दीनभावयं ।*
उस्सुअत्तं भयं सोगं, रइमरइं च वोसिरे ॥

छा. रागबन्धं प्रद्वेषं च हर्षं दीनभावताम् ।
उत्सुकत्वं भयं शोकं रतिमरतिं च व्युत्सृजामि ॥

मू. (६) *रोसेण पडिनिवेसेणं अकयण्णुयाए तहेवऽसज्झाए ।*
जो मे किंचिवि भणिओ तमहं (तिविहं) तिविहेण खामेमि ॥

छा. रोषेण प्रतिनिवेशेन अकृतज्ञतया तथैवासद्ध्यानेन यन्मया किञ्चिदपि
भणितं तदहं (त्रिविधं) त्रिविधेन क्षाम्यामि ॥

मू. (७) खामेमि सव्वजीवे, सव्वे जीवा खमंतु मे।
आमाओ (आसवे) वोसिरित्ताणं, समाहिं पडिवज्जए ॥

छा. क्षाम्यामि सर्वजीवान् सर्वे जीवाः क्षाम्यन्तु मयि।
आशा (आश्रवान्) व्युत्सृज्य समाधिं प्रतिसंदधे ॥

मू. (८) निंदामि निंदणिज्जं गरिहामि य जं च मे गरहणिज्जं।
आलोएमि य सव्वं जिनेहिं जं जं च पडिसिद्धं (कुइं) ॥

छा. निन्दामि निन्दनीयं गर्हे च यच्च मे गर्हणीयम्।
आलोचयामि च सर्वं जिनैर्यद् यच्च प्रतिषिद्धम् (कुष्ठं) ॥

मू. (९) उवहीं सरीरगं चेव, आहारं च चउव्विहं।
ममत्तं सव्वदव्वेसु, परिजाणामि केवलं ॥

छा. उपधिं शरीरमेव आहारं च चतुर्विधम्।
ममत्वं सर्वद्रव्येषु परिजानामि केवलम् ॥

मू. (१०) ममत्तं परिजाणामि, निम्ममत्ते उवट्ठिओ।
आलंबणं च मे आया, अवसेसं च वोसिरे ॥

छा. ममत्वं परिजानामि निर्ममत्वे उपस्थितः।
आलम्बनं च मे आत्मा अवशेषं च व्युत्सृजामि ॥

मू. (११) आया मे जं नाणे आया मे दंसणे चरित्ते य।
आया पच्चक्खामे आया मे संजमे जोगे ॥

छा. यन्मे ज्ञानमात्मा आत्मा मे दर्शनं चारित्रं च।
आत्मा प्रत्याख्यानं आत्मा मे संयमो योगश्च ॥

मू. (१२) मूलगुणे उत्तरगुणे जे मे नाराहिया पमाएणं।
ते सव्वे निंदामि पडिक्कमे आगमिस्साणं ॥

छा. मूलगुणा उत्तरगुणाश्च ये मया नाराधिताः प्रमादेन।
तान् सर्वान् निन्दामि प्रतिक्राम्याम्यागमिष्यताम् ॥

मू. (१३) इक्कोऽहं नत्थि मे कोई, न चाहमवि कस्सई।
एवं अदीमनसो, अप्पाणमनुसासए ॥

छा. एकोऽहं नास्ति मे कश्चित् न चाहमपि कस्यचित्।
एवमदीनमना आत्मानमनुशास्मि ॥

मू. (१४) इक्को उप्पज्जए जीवो, इक्को चेव विवज्जई।
इक्कस्स होइ मरणं, इक्को सिज्झइ नीरओ ॥

छा. एक उत्पद्यते जीव एकश्चैव विपद्यते।
एकस्य भवति मरणं एकः सिद्ध्यति नीरजाः ॥

मू. (१५) एक्को करेइ कम्मं फलमवि तस्सिक्कओ समनुहवइ।
इक्को जायइ मरइ परलोअं इक्कओ जाइ ॥

छा. एकः करोति कर्म फलमपि तस्यैककः समनुभवति ।
एको जायते म्रियते परलोकमेकको याति ॥

मू. (१६) *इक्को मे सासओ अप्पा, नाणदंसणसंजुओ (लक्खणो) ।*
सेसा मे बाहिरा भावा, सव्वे संजोगलक्खणा ॥

छा. एको मे शाश्वत आत्मा ज्ञानदर्शनसंयुतः (लक्षणः) ।
शेषा मे बाह्या भावाः सर्वे संयोगलक्षणाः ॥

मू. (१७) *संजोगमूला जीवेणं, पत्ता दुक्खपरंपरा ।*
तम्हा संजोगसंबंधं, सव्वं तिविहेण वोसिरे ॥

छा. संयोगमूला जीवेन प्राप्ता दुःखपरम्परा ।
तस्मात्संयोगसम्बन्धं सर्वं त्रिविधेन व्युत्सृजामि ॥

मू. (१८) *असंजममण्णाणं मिच्छत्तं सव्वओऽवि अ ममत्तं ।*
जीवेसु अजीवेसु य तं निंदे तं च गरिहामि ॥

छा. असंयममज्ञानं मिथ्यात्वं सर्वतोऽपि च ममत्वम् ।
जीवेष्वजीवेषु च तन्निन्दामि तच्च गर्हे ॥

मू. (१९) *मिच्छत्तं परिजाणामि सव्वं असंजमं अलीयं च ।*
सव्वत्तो अ ममत्तं वयामि सव्वं च खामेमि ॥

छा. मिथ्यात्वं परिजानामि सर्वमसंयममलीकं च ।
सर्वतश्च ममत्वं त्यजामि सर्वं च क्षमयामि (क्षाम्यामि) ॥

मू. (२०) *जे मे जाणंति जिणा अवराहा जेसु जेसु ठाणेसु ।*
तं तह आलोएमी उवट्ठिओ सव्वभावेणं ॥

छा. यान् मे जानन्ति जिना अपराधान् येषु येषु स्थानेषु ।
तांस्तथाऽऽलोचयामि, उपस्थितः सर्वभावेन ॥

मू. (२१) *उप्पन्नाणुप्पन्ना माया अणुमग्गओ निहंतव्वा ।*
आलोयणनिंदणगरिहणाहिं न पुणत्ति या बीयं ॥

छा. उत्पन्नाऽनुत्पन्ना मायाऽनुमार्गतो निहन्तव्या ।
आलोचननिन्दनगर्हाभिर्न पुनरिति च द्वितीयम् ॥

मू. (२२) *जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणइ ।*
तं तह आलोइज्जा मायामयविप्पमुक्को उ ॥

छा. यथा बालो जल्पन् कार्यमकार्यं च ऋजुकं भणति ।
तत्तथाऽऽलोचयेन्मायामदविप्रमुक्त एव ॥

मू. (२३) *सोही उज्जुगभूयस्स, धम्मो सुद्धस्स चिट्ठई ।*
निव्वाणं परमं जाइ, घयसित्तुव्व पावए ॥

छा. शुद्धि ऋजुभूतस्य धर्म शुद्धस्य तिष्ठति ।
निर्वाणं परमं याति घृतसिक्त इव पावकः ॥

मू. (२४) *न हु सिज्झई ससल्लो जह भणियं सासणे धुयरयाणं ।*
उद्धरियसव्वसल्लो सिज्झइ जीवो धुअकिलेसो ॥

छा. नैव सिद्ध्यति सशल्यो यथा भणितं शासने धुतरजसाम् ।
उद्धृतसर्वशल्यः सिद्ध्यति जीवो धुतक्लेशः ॥

मू. (२५) *सुबहुंपे भावसल्लं जे आलोयंति गुरुसगासंमि ।*
निस्सल्ला संथारगमुविंति आराहगा हुंति ॥

छा. सुबहूपि भावशल्यमालोच्य (चयन्ति) गुरुसकाशे ।
निशल्यः संस्तारकमुपयान्त्याराधका भवन्ति ॥

मू. (२६) *अप्पंपि भावसल्लं जे नालोयंति गुरुसगासंमि ।*
धंतंपि सुयसमिद्धा न हु ते आराहगा हुंति ॥

छा. अल्पमपि भावशल्यं ये नालोचयन्ति गुरुसकाशे ।
बाढमपि श्रुतसमृद्धा नैव ते आराधका भवन्ति ॥

मू. (२७) *नवि तं सत्थं च विसं च दुप्पउत्तो व कुणइ वेयालो ।*
जंतं व दुप्पउत्तं सप्पुव्व पमायओ कुद्धो ॥

छा. नैव तच्छस्त्रं च विषं च दुष्प्रयुक्तो वा करोति वैतालः ।
यन्त्रं च दुष्प्रयुक्तं सर्पो वा प्रमादतः क्रुद्धः ॥

मू. (२८) *जं कुणइ भावसल्लं अनुद्धियं उत्तमट्ठकालंमि ।*
दुल्लभबोहियत्तं अनंतसंसारियत्तं च ।

छा. यत्करोति भावशल्यमनुद्धृतं तमुत्तमार्थकाले ।
दुर्लभबोधिकत्वमनन्तसंसारिकत्वं च ॥

मू. (२९) *तो उद्धरंति गारवरहिया मूलं पुणब्भवलयाणं ।*
मिच्छादंसणसल्लं मायासल्लं नियाणं च ॥

छा. तत उद्धरन्ति गौरवरहिता मूलं पुनर्भवलतानाम् ।
मिथ्यादर्शनशल्यं मायाशल्यं निदानशल्यं च ॥

मू. (३०) *कयपावोऽवि मणूसो आलोइ निंदिओ (निन्दिय) गुरुसगासे ।*
होइ अइरेगलहुओ ओहरियभरुव्व भारवहो ॥

छा. कृतपापोऽपि मनुष्य आलोचितनिन्दितः (आलोच्य निन्दित्वा) गुरुसकाशे
भवत्यतिरेकलघुः उत्तारितभर इव भारवाट् ॥

मू. (३१) *तस्स य पायच्छित्तं जं मग्गविऊगुरू उवइसंति (वइस्संति) ।*
तं तह अनुसरियव्वं अणवत्थपसंगभीएणं ॥

छा. तस्य च प्रायश्चित्तं यन्मार्गविदो गुरव उपदिशन्ति (वो वदिष्यन्ति) ।
तत्तथाऽनुसर्तव्यमनवस्थाप्रसङ्गभीरुणा ॥

मू. (३२) *दसदोसविप्पमुक्कं तम्हा सव्वं अगूहमाणेणं ।*
जं किंपि कयमकज्जं तं जहवत्तं कहेयव्वं ॥

छा. दशदोषविप्रमुक्तं तस्मात्सर्वमगूहमानेन ।
यत्किमपि कृतमकार्यं तद् यथावृत्तं कथयितव्यम् ॥

मू. (३३) *सव्वं पाणारंभं पच्चक्खामि य अलियवयणं च ।*
सव्वमदिन्नादाणं अब्बंभपरिग्गहं चेव ॥

छा. सर्वं प्राणारम्भं प्रत्याख्यामि चालीकवचनं च ।
सर्वमदत्तादानमब्रह्म परिग्रहं चैव ॥

मू. (३४) *सव्वंपि असनपानं चउव्विहं जो अ बाहिरो उवही ।*
अब्भितरं च उवहिं सव्वं तिविहेण वोसिरे ॥

छा. सर्वमप्यशनं पानं चतुर्विधं यश्च बाह्य उपधि(तं) ।
अभ्यन्तरं चोपधिं सर्वं त्रिविधेन व्युत्सृजामि ॥

मू. (३५) *कंतारे दुब्भिक्खे आयंके व महया समुप्पन्ने ।*
जं पालियं न भग्गं तं जाणसु पालणासुद्धं ॥

छा. कान्तारे दुर्भिक्षे आतङ्के वा महति समुत्पन्ने ।
यत्पालितं न भग्नं तत् (प्रत्याख्यानं) जानीहि पालनाशुद्धम् ॥

मू. (३६) *रागेण व दोसेण व परिणामे ण व न दूसियं जं तु ।*
तं खलु पच्चक्खाणं भावविसुद्धं मुणेयव्वं ॥

छा. रागेण वा दोषेण वा परिणामेन वा न दूषितं यत्तु ।
तत्खलु प्रत्याख्यानं भावविशुद्धं ज्ञातव्यम् ॥

मू. (३७) *पीयं थणअच्छीरं सागरसलिलाउ बहुतरं हुज्जा ।*
संसारंमि अनंते माईणं अन्नमन्नाणं ॥

छा. पीतं स्तनक्षीरं सागरसलिलाद् बहुतरं भवेत् ।
संसारेऽनन्ते मातृणामन्यान्यासाम् ॥

मू. (३८) *बहुसोऽवि मए रुण्णं पुणो पुणो तासु तासु जाईसु ।*
नयणोदंपि जाणसु बहुययरं सागरजलाओ ॥

छा. बहुशोऽपि मया रुदितं पुनः पुनस्तासु तासु जातिषु ।
(तत्र) नयनोदकमपि जानीहि बहुतरं सागरजलात् ॥

मू. (३९) *नत्थि किर सो पएसो लोए वालग्गकोडिमित्तोऽवि ।*
संसारे संसरंतो जत्थ न जाओ मओ वावि ॥

छा. नास्ति किल स प्रदेशो लोके वालाग्रकोटीमात्रोऽपि ।
संसारे संसरन् यत्र न जातो न मृतो वाऽपि ॥

मू. (४०) *चुलसीई किल लोए जोणी पमुहाइं (जोणीणं पमुह०) सयसहस्साइं ।*
इक्किक्कंमि य इत्तो अनंतखुत्तो समुप्पन्नो ॥

छा. चतुरशीति किल लोके योनिप्रमुखाणि शतसहस्राणि ।
एकैकस्मिंश्चेतोऽनन्तकृत्वः समुत्पन्नः ॥

मू. (४१) *उड्ढमहे तिरियंमि य मयाइं बहुयाइं बालमरणाइं ।*
तो ताइं संभरंतो पंडियमरणं मरीहामि ।।

छा. ऊर्द्धमधस्तिरश्चि च मृतानि बहुकानि बालमरणानि ।
ततस्तानि स्मरन् पण्डितमरणं मरिष्ये ।।

मू. (४२) *माया मित्ति पिया मे भाया भगिणी य पुत्त धूया य ।*
एयाइं संभरंतो पंडियमरणं मरीहामि ।।

छा. माता मे इति पिता मे भ्राता भगिनी च पुत्रा दुहितरश्च ।
एतानि (अनन्तानि) स्मरन् पण्डितमरणं मरिष्ये ।।

मू. (४३) *मायापिइबंधूहिं संसारत्थेहिं पूरिओ लोगो ।*
बहुजोणिवासिएहिं न य ते ताणं च सरणं च ।।

छा. मातापितृबन्धुभिः संसारस्थैः पूरितो लोकः ।
बहुयोनिनिवासिभिर्न च ते त्राणं च शरणं च ।।

मू. (४४) *इक्को करेइ कम्मं इक्को अनुहवइ दुक्खविवागं ।*
इक्को संसरइ जिओ जरमरणचउग्गईगुविलं ।।

छा. एकः करोति कर्म एकोऽनुभवति दुष्कृतविपाकम् ।
एकः संसरति जीवो जरामरणचतुर्गतिगुपिलम् (भवं) ।।

मू. (४५) *उव्वेयणयं जम्मणमरणं नरएसु वेयणाओ या ।*
एयाइं संभरंतो पंडियमरणं मरीहामि ।।

छा. उद्वेजकं जन्ममरणं नरकेषु वेदनाश्च ।
एताः स्मरन् पण्डितमरणं मरिष्ये ।।

मू. (४६) *उव्वेयणयं जम्मणमरणं तिरिएसु वेयणाओ वा ।*
एयाइं संभरंतो पंडियमरणं मरीहामि ।।

छा. उद्वेजकं० तिर्यक्षु वेदनाश्च० ।।

मू. (४७) *उव्वेयणयं जम्मणमरणं मणुएसु वेयणाओ वा ।*
एयाइं संभरंतो पंडियमरणं मरीहामि ।।

छा. उद्वेजक० । मनुजेषु० ।।

मू. (४८) *उव्वेयणयं जम्मणमरणं चवणं च देवलोगाओ ।*
एयाइं संभरंतो पंडियमरणं मरीहामि ।।

छा. उद्वेजकं० । च्यवनं च देवलोकात्० ।।

मू. (४९) *इक्कं पंडियमरणं छिंदइ जाईसयाइं बहुआइं ।*
तं मरणं मरियव्वं जेण मओ सम्मओ होइ ।।

छा. एकं पण्डितमरणं छिनत्ति जातिशतानि बहुकानि ।
तन्मरणं मर्त्तव्यं येन मृतः सन् मृतो भवति ।।

मू. (५०) *कइया णु तं सुमरणं पंडियमरणं जिणेहिं पन्नत्तं ।*
सुद्धो उद्धियसल्लो पाओवगओ मरीहामि ।।

छा. कदा तत् सुमरणं पण्डितमरणं जिनैः प्रज्ञप्तम् ।
शुद्ध उञ्छ तशल्यः पादपोपगतो मरिष्ये ॥

मू. (५१) *भवसंसारे सव्वे चउव्विहा पुग्गला मए बद्धा ।*
परिणामपसंगेणं अट्ठविहे कम्मसंघाए ॥

छा. भवसंसारे सर्वे चतुर्विधाः पुद्गला मया बद्धाः ।
परिणामप्रसङ्गेन अष्टविधे कर्मसङ्घाते ॥

मू. (५२) *संसारचक्कवाले सव्वे ते पुग्गलामए बहुसो ।*
आहारिय य परिणामिया य नयऽहं गओ तित्तिं ॥

छा. संसारचक्रवाले सर्वे ते पुद्गला मया बहुशः ।
आहारिताश्च परिणामिताश्च न चाहं गतस्तृप्तिम् ॥

मू. (५३) *आहारनिमित्तेणं अहयं सव्वेसु नरयलोएसु ।*
उववण्णोमि य बहुसो सव्वासु य मिच्छजाईसु ॥

छा. आहारनिमित्तमहं सर्वेषु नरकलोकेषु ।
उत्पन्नोऽस्मि च बहुशः सर्वासु च म्लेच्छजातिषु ॥

मू. (५४) *आहारनिमित्तेणं मच्छा गच्छंति दारुणे नरए ।*
सचित्तो आहारो न खमो मणसावि पत्थेउं ॥

छा. आहारनिमित्तं मत्स्या गच्छन्ति दारुणे नरके ।
सचित्त आहारो न क्षमो मनसाऽपि प्रार्थयितुम् ॥

मू. (५५) *तणकट्ठेण व अग्गी लवणजलो वा नईसहस्सेहिं ।*
न इमो जीवो सक्को तिप्पेउं कामभोगेहिं ॥

छा. तृणकाष्ठेनाग्निरिव लवणोदो नदीसहस्रैरिव ।
नायं जीवः शक्यस्तर्पयितुं कामभोगैः ॥

मू. (५६) *तणकट्ठेण व अग्गी लवणजलो वा नईसहस्सेहिं ।*
न इमो जीवो सक्को तिप्पेउं अत्थसारेणं ॥

छा. तृण० । अर्थसारेण

मू. (५७) *तणकट्ठेण व अग्गी लवणजलो वा नईसहस्सेहिं ।*
न इमो जीवो सक्को तिप्पेउं भोअणविहीए ॥

छा. तृण० । भोजनविधिना ॥

मू. (५८) *वलयामुहसामाणो दुप्पारो व नरओ अपरिमिज्जो ।*
न इमो जीवो सक्कोतप्पेउं गंधमल्लेहिं ॥

छा. वडवामुखसमानो दुष्पारो नरक इवापरिमेयः । नायं० गन्धमाल्यैः) ॥

मू. (५९) *अवियद्धोऽ(अवितत्तो)यं जीवो अईयकालम्मि आगमिस्साए ।*
सद्दाण य रूवाण य गंधाण रसाण फासाणं ।

छा. अविदग्धो (अवितृप्तो) ऽयं जीवोऽतीतकाले आगमिष्यति ।
शब्दानां रूपाणां गन्धानां रसानां स्पर्शानाम् (भोगेषु)

मू. (६०) कप्पतरुसंभवेसु देवुत्तरकुरुवंसपसूएसु ।
उववाए ण य तित्तो न य नरविज्जाहरसुरेसु ॥

छा. कल्पतरुसंभवेषु देवकुरूत्तरकुरुवर्षप्रसुतेषु ।
उपपातेन च तृप्तो न च नरविद्याधरसुरेषु ॥

मू. (६१) खइएण व पीएण व न य एसो ताइओ हवइ अप्पा ।
जह दुग्गइं न वच्चइ तो नूनं ताइओ होई ॥

छा. खादितेन वा पीतेन वा न चैष त्रासो भवत्यात्मा ।
यदि दुर्गतिं न व्रजति तदा नूनं त्रातो भवति ॥

मू. (६२) देविंदचक्कवट्टित्तणाइं रज्जाइं उत्तमा भोगा ।
पत्ता अनंतखुत्तो न यऽहं तित्तिं गओ तेहिं ॥

छा. देवेन्द्रचक्रवर्त्तित्वानि राज्यानि उत्तमा भोगाः ।
प्राप्ता अनन्तकृत्वो न चाहं तृप्तिं गतस्तैः ॥

मू. (६३) खीरदगेच्छुरसेसु साऊसु महोदहीसु बहुसोऽवि ।
उववण्णो न य तण्हा छिन्ना मे (मे) सीयलजलेणं ॥

छा. क्षीरोदधीक्षुरसेषु स्वादिष्टेषु महोदधिषु बहुशोऽपि ।
उत्पन्नो न च तृष्णा छिन्ना भवतां (मम) शीतलजलेन ॥

मू. (६४) तिविहेण य सुहमउलं तम्हा कामरइविसयसुक्खाणं ।
बहुसो सुहमनुभूयं न य सुहतण्हा परिच्छिण्णा ॥

छा. त्रिविधेन च सुखमतुलं तस्मात्कामरतिविषयसौख्यानाम् ।
बहुशः सुखमनुभूतं न च सुखतृष्णा परिच्छिन्ना ॥

मू. (६५) जा काइ पत्थणाओ कया मए रागदोसवसएण ।
पडिबंधेण बहुविहं तं निंदे तं च गरिहामि ॥

छा. याः काश्चिदार्थनाः कृता मया रागद्वेषवशगेन ।
प्रतिबन्धेन बहुविधेन तन्निन्दामि तच्च गर्हे ॥

मू. (६६) हंतूण मोहजालं छित्तूण य अट्ठकम्मसंकलियं ।
जम्मणमरणऽरहट्टं भित्तूण भवा विमुच्चिहिसि ॥

छा. हत्वा मोहजालं छित्वा चाष्ट कर्माणि सङ्कलितानि ।
जन्ममरणारहट्टं भित्वा भवाद्विमोक्ष्यसे ॥

मू. (६७) पंच य महव्वयाइं तिविहं तिविहेण चारुहेऊणं ।
मनवयणकायगुत्तो सओ मरणं पडिच्छिज्जा ॥

छा. पञ्च च महाव्रतानि त्रिविधत्रिविधेनारुह्य ।
मनोवचनकायगुप्तः सद्यो मरणं परिच्छिन्द्यात् (प्रतीच्छेत्) ॥

मू. (६८) कोहं माणं मायं लोहं पिज्जं तहेव दोसं च ।
वइऊण अप्पमत्तो रक्खामि महव्वए पंच ॥

छा. क्रोधं मानं मायां लोभं प्रेम तथैव द्वेषं च ।
त्यक्त्वाऽप्रमत्तो रक्षामि महाव्रतानि पञ्च ॥

मू. (६९) *कलहं अब्भक्खाणं पेसुण्णंपि य परस्स परिवायं ।*
परिवज्जंतो गुत्तो रक्खामि महव्वए पंच ॥

छा. कलहमभ्याख्यानं पैशून्यमपि च परस्य परिवादम् ।
परिवर्जयन् गुप्तो रक्षामि० ॥

मू. (७०) *पंचिंदियसंवरणं पंचेव निरुंभिऊण कामगुणे ।*
अज्झासायणभीओ रक्खामि महव्वए पंच ॥

छा. पञ्चेन्द्रियसंवरणं (कृत्वा) पञ्चैव निरुध्य कामगुणान् ।
अतयाशातनाभीतो रक्षामि० ॥

मू. (७१) *किण्हानीलाकाऊलेसा झाणाइं अट्टरुद्दाइं ।*
परिवज्जंतो गुत्तो रक्खामि महव्वए पंच ॥

छा. कृष्णानीलाकापोतीलेश्या ध्याने आर्त्तरौद्रे । परि० ॥

मू. (७२) *तेऊपम्हासुक्कालेसा झाणाइं धम्मसुक्काइं ।*
उवसंपन्नो जुत्तो रक्खामि महव्वए पंच ॥

छा. तैजसीपद्माशुक्ललेश्या ध्याने धर्म्मशुक्ले ।
उपसंपन्नो युक्तो रक्षामि० ॥

मू. (७३) *मणसा मणसच्चविऊ वायासच्चेण करणसच्चेण ।*
तिविहेणवि सच्चविऊ रक्खामि महव्वए पंच ॥

छा. मनसा मनःसत्यवित् वाक्सत्येन करणसत्येन ।
त्रिविधेनापि सत्यवित् रक्षामि० ॥

मू. (७४) *सत्तभयविप्पमुक्को चत्तारि निरुंभिऊण य कसाए ।*
अट्ठमयट्ठाणजढो रक्खामि महव्वए पंच ॥

छा. सप्तभयविप्रमुक्तश्चतुरो निरुध्य च कषायान् ।
त्यक्ताष्टमदस्थानो रक्षामि० ॥

मू. (७५) *गुत्तीओ समिई भावणाओ नाणं च दंसणं चेव ।*
उवसंपन्नो जुत्तो रक्खामि महव्वए पंच ॥

छा. गुप्तीः समितीर्भावना ज्ञानं च दर्शनं चैव ।
उपसंपन्नो युक्तो रक्षामि० ॥

मू. (७६) *एवं तिदंडविरओ तिकरणसुद्धो तिसल्लनिस्सल्लो ।*
तिविहेण अप्पमत्तो रक्खामि महव्वए पंच ॥

छा. एवं त्रिदण्डविरतस्त्रिकरणशुद्धस्त्रिशल्यनिशल्यः ।
त्रिविधेनाप्रमत्तो रक्षामि० ॥

मू. (७७) *संगं परिजाणामि सल्लं तिविहेण उद्धरेऊणं ।*
गुत्तीओ समिईओ मज्झं ताणं च सरणं च ॥

छा. सङ्गं परिजानामि शल्यं त्रिविधेनोद्धृत्य ।
गुप्तयः समितयश्च मम त्राणं च शरणं च ॥

मू. (७८) *जह खुहियचक्कवाले पोयं रयणभरियं समुद्दंमि ।*
निज्जामगा धरिंती कयकरणा बुद्धिसंपन्ना ॥

छा. यथा क्षुभितचक्रवाले पोतं रत्नभृतं समुद्रे ।
निर्यामका धारयन्ति कृतकरणा बुद्धिसंपन्नाः ॥

मू. (७९) *तवपोयं गुणभरियं परीसहुम्मीहि खुहियमारद्धं ।*
तह आराहिंति विऊ उवएसवलंबगा धीरा ॥

छा. तपःपोतं गुणभृतं परीषहोर्मीभि क्षोभितुमारब्धम् ।
तथाऽऽराधयन्ति विद् उपदेशावलम्बका धीराः ॥

मू. (८०) *जई ताव ते सुपुरिसा आयारोवियभरा निरवयक्खा ।*
पब्भारकंदरगया साहिंती अप्पणो अट्ठं ॥

छा. यदि तावत्ते सुपुरुषा आत्मारोपितभरा निरपेक्षाः ।
प्राग्भारकन्दरगताः साधयन्त्यात्मनोऽर्थम् ॥

मू. (८१) *जइ ताव ते सुपुरिसा गिरिकंदरकडगविसमदुग्गेसु ।*
धिइधणियबद्धकच्छा साहिंती अप्पणो अट्ठं ॥

छा. यदि तावत्ते सुपुरुषा गिरिकन्दरकटकविषमदुर्गेषु ।
धृतिगाढबद्धकक्षाः साध० ऽर्थम् ॥

मू. (८२) *किं पुण अनगारसहायगेण अण्णुण्णसंगहबलेणं ।*
परलोए णं सक्को साहेउं अप्पो अट्ठं ॥

छा. किं पुनरनगारसहायकेन अन्यान्यसङ्ग्रहबलेन ।
अपरलोकेन (न) शक्यः साध० ॥

मू. (८३) *जिणवयणमप्पमेयं मधुरं कण्णाहुइं सुणंतेणं ।*
सक्को हु साहुमज्झे साहेउं अप्पणो अट्ठं ॥

छा. जिनवचनमप्रमेयं मधुरं कर्णाभ्यां (कर्णाभृति) शृण्वता ।
शक्यः (न) साधुमध्ये साध० ऽर्थम् ॥

मू. (८४) *धीरपुरिसपण्णत्तं सप्पुरिसनिसेवियं परमघोरं ।*
धन्ना सिलायलगया साहिंती अप्पणो अट्ठं ॥

छा. धीरपुरुषप्रज्ञप्तं सत्पुरुषनिसेवितं परमघोरम् ।
धन्याः शिलातलगता साधयन्त्यात्मनोऽर्थम् ॥

मू. (८५) *बाहिंति इंदियाइं पुव्वमकारियपइण्णचारीणं ।*
अकयपरिकम्मकीवा मरणे सुहसंगतायंमि ॥

छा. बाधयन्तीन्द्रियाणि पूर्वमकारितप्रकीर्णचारिणाम् ।
अकृतपरिकर्माणः क्लीबा (आत्मानः) मरणे सुखसङ्गत्यागे (त्याये) ॥

मू. (८६) *पुव्वमकारियजोगो समाहिकामो अ मरणकालंमि ।*
न भवइ परीसहसहो विसयसुहसमुइओ अप्पा ॥

छा. पूर्वमकातयोगः समाधिकामश्च मरणकाले ।
नभवति परीषहसहिष्णुर्विषयसुखसमुचित आत्मा ॥

मू. (८७) *पुव्विं कारियजोगो समाहिकामो य मरणकालंमि ।*
स भवइ परीसहसहो विसयसुहनिवारिओ अप्पा ॥

छा. पूर्वं कारितयोगः समाधिकामश्च मरणकाले ।
संभवति परषहसहो निवारितविषयसुख आत्मा ॥

मू. (८८) *पुव्विं कारियजोगो अनियाणो ईहिऊण मइपुव्वं ।*
ताहे मलियकसाओ सज्जो मरणं पिच्छिज्जा ॥

छा. पूर्वं कारितयोगोऽनिदान ईहित्वा मतिपूर्वम् ।
तदा मर्दितकषायः सद्यो मरणं प्रतीच्छेत् ॥

मू. (८९) *पावीणं पावाणं कम्माणं अप्पणो सकम्माणं ।*
सक्का पलाइउं जे तवेण सम्मं पउत्तेणं ॥

छा. पापानां पापेभ्यः कर्मेभ्य आत्मनः सकर्मेभ्यः (स्वकृतेभ्यः) ।
शक्यः पलायितुं तपसा सम्यक्प्रयुक्तेन ॥

मू. (९०) *इक्कं पंडियमरणं पडिवज्जिय सुपुरिसो असंभंतो ।*
खिप्पं सो मरणाणं काही अंतं अनंताणं ॥

छा. एकं पण्डितमरणं प्रतिपद्य सुपुरुषोऽसंभ्रान्तः ।
क्षिप्रं स मरणानां करिष्यत्यन्तमनन्तानाम् ॥

मू. (९१) *किं तं पंडियमरणं ? काणि व आलंबणाणि भणियाणि ।*
एयाइं नाऊणं किं आयरिया पसंसंति ॥

छा. किं तत्पण्डितमरणं ? कानि वाऽऽलम्बनानि भणितानि ।
एतानि ज्ञात्वा किमाचार्या प्रशंसन्ति ? ॥

मू. (९२) *अनसनपाओवगमं आलंबणझाणभावणाओ अ ।*
एयाइं नाऊणं पंडियमरणं पसंसंति ॥

छा. अनशनपादपोपगमनमालम्बनं ध्याने भावनाश्च ।
एतानि ज्ञात्वा पण्डितमरणं प्रशंसन्ति ॥

मू. (९३) *इंदियसुहसाउलओ घोरपरीसहपराइयपरज्झो ।*
अकयपरिकम्मकीवो मुज्झइ आराहणाकाले ॥

छा. इन्द्रियसुखसाताकुलो घोरपरीषहपराजितापराद्धः ।
अकृतपरिकर्मा क्लीबो मुह्यत्याराधनाकाले ॥

मू. (९४) *लज्जाइ गारवेण य बहुसुयमएण वावि दुच्चरियं ।*
जे न कहंति गुरूणं न हु ते आराहगा हुंति ॥

छा. लज्जया गौरवेण च बहुश्रुतमदेन वाऽपि दुश्चरितम् ।
ये न कथयन्ति गुरुभ्यो नैव ते आराधका भवन्ति ॥

मू. (९५) *सुज्झइ दुक्करकारी जाणइ मग्गंति पावए कित्तिं ।*
विणिगूहिंतो निंदइ तम्हा आराहणा सेया ॥

छा. शुध्यति दुष्करकारी जानाति मार्गमिति प्राप्नोति कीर्त्तिम् ।
विनिगूहानो निन्दति (विनिगूहमानो निन्द्यते) तस्मादाराधना श्रेयसी ॥

मू. (९६) *नवि कारणं तणमओ संथारो नवि य फासुया भूमी ।*
अप्पा खलु संथारो होई विसुद्धो मणो जस्स ॥

छा. नैव कारणं तृणमयः संस्तारकः, नैव च प्रासुका भूमिः ।
आत्मैव संस्तारको भवति विशुद्धं मनो यस्य ॥

मू. (९७) *जिनवयणअनुगया मे होउ मई झाणजोगमल्लीणा ।*
जह तंमि देसकाले अमूढसन्नो चयइ देहं ॥

छा. जिनवचनमनुगता मम भवतु मतिर्ध्यानयोगमाश्रिता ।
यथा तस्मिन् देशकालेऽमूढसंज्ञस्त्यजेयं देहम् ॥

मू. (९८) *जाहे होई पमत्तो जिनवयण (सइ) रहिओ अनाइत्तो ।*
ताहे इंदियचोरा करिंति तवसंजमविलोमं ॥

छा. यदा भवति प्रमत्तो जिनवचन (स्मृति) रहितोऽनायत्तः ।
तदेन्द्रियचौराः कुर्वन्ति तपःसंयम विलोम(प)म् ॥

मू. (९९) *जिनवयणमनुगयमई जं वेलं होइ संवरपविट्ठो ।*
अग्गीव वाउसहिओ समूलडालं डहइ कम्मं ॥

छा. जिनवचनानुगतमतिर्यां वेलां (यावत्) भवति संवरप्रविष्टः ।
अग्निरिव वायुसहितः समूलशाखं वहति कर्म (वृक्षम्) ॥

मू. (१००) *जह डहइ वाउसहिओ अग्गी रुक्खे विहरि वनखंडे ।*
तह पुरिसकारसहिओ नाणी कम्मं खयं नेई ॥

छा. यथा दहति वायुसहितोऽग्निर्विहत्य वनखण्डे ।
तथा पुरुषकारसहितो ज्ञानी कर्म क्षयं नयति ॥

मू. (१०१) *जं अन्नाणीकम्मं खवेइ बहुआहिं वासकोडीहिं ।*
तं नाणी तिहिं गुत्तो खवेइ ऊसासमित्तेणं ॥

छा. यत् अज्ञानी कर्म क्षपयति बहुकाभिर्वर्षकोटीभि ।
तज्ज्ञानी त्रिभिर्गुप्तः क्षपयत्युच्छ्वासमात्रेण ॥

मू. (१०२) *न हु मरणंमि उवग्गे सक्को बारसविहो सुयकखंधो ।*
सव्वो अनुचिंतेउं धणियंपि समत्थचित्तेणं ॥

छा. नैव मरणे उपाग्रे शक्यो द्वादशविधः श्रुतस्कन्धः ।
सर्वोऽनुचिन्तयितुं बाढमपि समर्थचित्तेन ॥

मू. (१०३) *इक्कंमिवि जंमि पए संवेगं कुणइ वीयरायमए ।*
सो तेन मोहजालं छिंदइ अज्झप्पओगेणं ।।

छा. एकस्मिन्नपि यस्मिन् पदे संवेगं करोति वीतरागमते ।
स तेन मोहजालं छिनत्त्यध्यात्मयोगेन ।।

मू. (१०४) *इक्कंमिवि जंमि पए संवेगं कुणइ वीयरायमए ।*
तं तस्स होइ नाणं जेण विरागत्तणमुवेइ ।।

छा. एकस्मिन्नपि यस्मिन् पदे संवेगं करोति वीतरागमते ।
तत्तस्य भवति ज्ञानं येन विरागत्वमुपैति ।।

मू. (१०५) *इक्कंमिवि जंमि पए संवेगं कुणइ वीयरायमए ।*
वच्चइ नरो अभिक्खं तं मरणं तेण मरियव्वं ।।

छा. एकस्मिन्नपि० ।
व्रजति नरोऽभीक्ष्णं तन्मरणं तेन मर्त्तव्यम् ।।

मू. (१०६) *जेण विरागो जायइ तं तं सव्वायरेण कायव्वं ।*
मुच्चइ हु संवेगी अनंतओ होइ असंवेगी ।।

छा. येन विरागो जायते तत्तत् सर्वादरेण कर्त्तव्यम् ।
मुच्यते संवेग्येव अनन्तगो भवत्यसंविग्नः ।।

मू. (१०७) *धम्मं जिनपन्नत्तं सम्ममिणं सद्दहामि तिविहेणं ।*
तसथावरभूअहियं पंथं निव्वाणनगरस्स ।।

छा. धर्मं जिनप्रज्ञप्तं सम्यग् इमं श्रद्दधे त्रिविधेन ।
त्रसस्थावरभूतहितं पन्थानं निर्वाणनगरस्य ।।

मू. (१०८) *समणोमित्ति य पढमं बीयं सव्वत्थ संजओ मिति ।*
सव्वं च वोसिरामि जिनेहिं जं जं च पडिकुट्ठं ।।

छा. श्रमणोऽस्मीति च प्रथमं द्वितीयं सर्वत्र संयतोऽस्मीति ।
सर्वं च व्युत्सृजामि जिनैर्यद् यच्च प्रतिकुष्टम् ।।

मू. (१०९) *उवही सरीरगं चेव, आहारं च चउव्विहं ।*
मनसावयकाएणं, वोसिरामिति भावओ ।।

छा. उपधिं शरीरमेव आहारं च चतुर्विधम् ।
मनोवाक्कायैर्व्युत्सृजामि इति भावतः ।।

मू. (११०) *मनसा अचिंतणिज्जं सव्वं भासाइ अभासणिज्जं च ।*
काएण अकरणिज्जं सव्वं तिविहेण वोसिरे ।।

छा. मनसाऽचिन्तनीयं सर्वं भाषयाऽभाषणीयं च ।
कायेनाकरणीयं सर्वं त्रिविधेन व्युत्सृजामि ।।

मू. (१११) *असंजमत्तोगसणं (असंजमे वेरमणं) उवही विवेगकरणं उवसमो (य) ।*
अप्पडिरुयजोगविरओ खंती मुत्ती विवेगो अ ।।

छा. असंयमत्वापकर्षणं (असंयमाद्विरमणं) उपधिविवेककरणमुपशमः (च) ।
अप्रतिरुगयोगविरतः क्षान्तिर्मुक्तिर्विवेकश्च ॥

मू. (११२) *एयं पच्चक्खाणं आउरजण आवईसु भावेण ।*
अन्नयरं पडिवण्णो जंपंतो पावइ समाहिं ॥

छा. एतत्प्रत्याख्यानमातुरजन आपत्सु भावेन ।
अन्यतरत्प्रतिपन्नो जल्पन् (यत् प्राप्तः) प्राप्नोति समाधिम् ॥

मू. (११३) *एयंसि निमित्तंमी पच्चक्खाऊण जइ करे कालं ।*
तो पच्चाइक्खं [illegible]

छा. एतस्मिन् निमित्ते प्रत्याख्याय यदि (यति) करोति कालम् ।
तत् प्रत्याख्यातव्यमनेनैकेनापि पदेन ॥

मू. (११४) *मम मंगलमरिहंता सिद्धा साहू सुयं च धम्मो य ।*
तेसिं सरणोवगओ सावज्जं वोसिरामित्ति ॥

छा. मम मङ्गलमर्हन्तः सिद्धाः साधवः श्रुतं च धर्मश्च ।
तेषां शरणमुपगतः सावद्यं व्युत्सृजामीति ॥

मू. (११५) *अरहंता मंगलं मज्झ, अरहंता मज्झ देवया ।*
अरहंते कित्तइत्ताणं, वोसिरामित्ति पावगं ॥

छा. अर्हन्तो मङ्गलं मम अर्हन्तो मम देवताः ।
अर्हतः कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥

मू. (११६) *सिद्धा य मंगलं मज्झ, सिद्धा य मज्झ देवया ।*
सिद्धे य कित्तइत्ताणं, वोसिरामित्ति पावगं ॥

छा. सिद्धाश्च मङ्गलं मम सिद्धाश्च मम देवताः ।
सिद्धांश्च कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥

मू. (११७) *आयरिया मंगलं मज्झ, आयरिया मज्झ देवया ।*
आयरिए कित्तइत्ताणं, वोसिरामित्ति पावगं ॥

छा. आचार्या मङ्गलं मम आचार्या मम देवताः ।
आचार्यान् कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥

मू. (११८) *उज्झाया मंगलं मज्झ, उज्झाया मज्झ देवया ।*
उज्झाए कित्तइत्ताणं, वोसिरामित्ति पावगं ॥

छा. उपाध्याया मङ्गलं मम उपाध्याया मम देवताः ।
उपाध्यायान् कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥

मू. (११९) *साहू य मंगलं मज्झ, साहू य मज्झ देवया ।*
साहू य कित्तइत्ताणं, वोसिरामित्ति पावगं ॥

छा. साधवश्च मङ्गलं मम साधवश्च मम देवताः ।
साधूश्च कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥

मू. (१२०) *सिद्धे उवसंपण्णो अरहंते केवलित्ति भावेणं ।*
इत्तो एगयरेणवि पएण आराहओ होइ ।।

छा. सिद्धानुपसंपन्नः अर्हतः केवलिन इति भावेन ।
एषामेकतरेणापि पदेनाराधको भवति ।।

मू. (१२१) *समुइण्णवेयणो पुण समणो हियएण किंपि चिंतिज्जा ।*
आलंबणाइं काइं काऊण मुणी दुहं सहइ ।।

छा. समुदीर्णवेदनः पुनः श्रमणो हृदये किमपि (किं वि) चिन्तयेत् ।
आलम्बनानि कानि कृत्वा मुनिर्दुखं सहते ।।

मू. (१२२) *वेयणासु उइन्नासु, किं मे सत्तं निवेयए ।*
किं वाऽऽलंबणं किच्चा, तं दुक्खमहियासए ।।

छा. वेदनासूदीर्णासु किं मम सत्वं (इति) निवेदयेत् ।
किं वाऽऽलम्बनं कृत्वा तद्दुखमध्यास्ते ।।

मू. (१२३) *अनुत्तरेसु नरएसु, वेयणाओ अनुत्तरा ।*
पमाए वट्टमाणेणं, मए पत्ता अनंतसो ।।

छा. अनुत्तरेषु नरकेषु वेदना अनुत्तराः ।
प्रमादे वर्त्तमानेन मया प्राप्ता अनन्तशः ।।

मू. (१२४) *मए कयं इमं कम्मं, समासज्ज अबोहिअं ।*
पोराणगं इमं कम्मं, मए पत्तं अनंतसो ।।

छा. मया कृतमिदं कर्म समासाद्याबोधिकम् ।
पुराणमिदं कर्म मया प्राप्तमनन्तशः ।।

मू. (१२५) *ताहिं दुक्खविवागाहिं, उवचिण्णाहिं तहिं तहिं ।*
न य जीवो अजीवो उ, कयपुव्वो उ चिंतए ।।

छा. ताभिर्दुखविपाकाभिरुपचीर्णाभिस्तत्र तत्र ।
न च जीवस्त्वजीवः कृतपूर्वस्तु (इति) चिन्तयेत् ।।

मू. (१२६) *अब्भुज्जुयं विहारं इत्थं जिनएसियं विउपसत्थं ।*
नाउं महापुरिससेवियं अब्भुज्जुयं मरणं ।।

छा. अभ्युद्यतं विहारमित्थं जिनदेशितं विद्वत्प्रशस्तम् ।
ज्ञात्वा महापुरुषसेवितमभ्युद्यतं मरणम् ।।

मू. (१२७) *जह पच्छिमंमि काले पच्छिमतित्थयरदेसियमुयारं ।*
पच्छा निच्छयपत्थं उवेमि अब्भुज्जुयं मरणं ।।

छा. यथा पश्चिमे काले पश्चिमतीर्थकरदिष्टमुपकारम् ।
पश्चान्निश्चयपथ्यमुपयाम्यभ्युद्यतं मरणम् ।।

मू. (१२८) *बत्तीसमंडियाहिं कडजोगी जोगसंगहबलेणं ।*
उज्जमिऊण य बारविहेण तवणेहपाणेणं ।।

छा. द्वात्रिंशन्मण्डिकाभिः कृतयोगी योगसङ्ग्रहबलेन ।
उद्यम्य च द्वादशविधेन तपःस्नेहपानेन ॥

मू. (१२९) *संसाररंगमज्झे थिइबलववसायबद्धकच्छाओ ।*
हंतूण मोहमल्लं हराहि आराहणपडागं ॥

छा. संसाररङ्गमध्ये धृतिबलव्यवसायबद्धकक्षः ।
हत्वा मोहमल्लं हराराधनापताकाम् ॥ युग्मम् ।

मू. (१३०) *पोराणगं च कम्मं खवेइ अन्नं नं च न चिणाइ ।*
कम्मकलंकलवल्लिं छिंदइ संथारमारूढो ॥

छा. पुराणं च कर्म क्षपयति अन्यन्नवं च न चिनाति ।
कर्मकलङ्कवल्लीं छिनत्ति संस्तारकमारूढः ॥

मू. (१३१) *आराहणोवउत्तो सम्मं काऊण सुविहिओ कालं ।*
उक्कोसं तिन्नि भवे गंतूण लभिज्ज निव्वाणं ॥

छा. आराधनोपयुक्तः सम्यक् कृत्वा सुविहितः कालम् ।
उत्कर्षतस्त्रीन् भवान् गत्वा लभते निर्वाणम् ॥

मू. (१३२) *धीरपुरिसपन्नत्तं सप्पुरिसनिसेवियं परमघोरं ।*
ओइण्णो हु सि रंगं हरसु पडायं अविग्घेणं ॥

छा. धीरपुरुषप्रज्ञप्तं सत्पुरुषनिषेवितं परमघोरम् ।
अवतीर्णोऽसि रङ्गं हर पताकामविघ्नेन ॥

मू. (१३३) *धीर ! पडागाहरणं करेह जह तंमि देसकालंमि ।*
सुत्तत्थमणुगुणंतो थिइनिच्चलबद्धकच्छाओ ॥

छा. धीर ! पताकाहरणं कुरु यथा तस्मिन् देशकाले ।
सूत्रार्थमनुगुणयन् धृतिनिश्चलबद्धकक्षः ॥

मू. (१३४) *चत्तारि कसाए तिन्नि गारवे पंच इंदियग्गामे ।*
हंता परीसहचमूं हराहि आराहणपडागं ॥

छा. चतुरः कषायान् त्रीणि गौरवाणि पञ्चेन्द्रियग्रामम् ।
हत्वा परीषहचमूं हरा (हरिष्यस्या) राधनापताकाम् ॥

मू. (१३५) *माऽऽया ! हु न चिंतिज्जा जीवामि चिरं मरामि व लहुंति ।*
जइ इच्छसि तरिउं जे संसारमहोअहिमपारं ॥

छा. मा आत्मन् ! चिन्तयेर्जीवामि चिरं म्रिये वा लघु इति ।
यदीच्छसि तरीतं संसारमहोदधिमपारम् ॥

मू. (१३६) *जइ इच्छसि नित्थरिउं सव्वेसिं चेव पावकम्माणं ।*
जिनवयणनाणदंसणचरित्तभावुज्जुओ जग्ग ॥

छा. यदीच्छसि निस्तरीतुं सर्वेभ्य एव पापकर्मेभ्यः ।
जिनवचनज्ञानदर्शनचारित्रभावोद्यतो जागृहि ॥

मू. (१३७) *दंसणनाणचरित्तं तवे य आराहणा चउक्खंधा ।*
सा चेव होइ तिविहा उक्कोसा मज्झिम जहन्ना ॥

छा. दर्शनज्ञानचारित्राणि तपश्चाराधना चतुःस्कन्धा ।
सा चैव भवति त्रिविधा उत्कृष्टा मध्यमा जघन्या ॥

मू. (१३८) *आराहेऊण विऊ उक्कोसाराहणं चउक्खंधं ।*
कम्मरयविप्पमुक्को तेणेव भवेण सिज्झिज्जा ॥

छा. आराध्य विद्वान् उत्कृष्टाराधनां चतुःस्कन्धाम् ।
कर्मरजोविप्रमुक्तस्तेनैव भवेन सिद्धयेत् ॥

मू. (१३९) *आराहेऊण विऊ जहन्नमाराहणं चउक्खंधं ।*
सत्तट्ठभवग्गहणे परिणामेऊण सिज्झिज्जा ॥

छा. आराध्य विद्वान् जघन्यामाराधनां चतुःस्कन्धाम् ।
सप्ताष्टभवग्रहणैः परिणम्य सिद्धयेत् ।.

मू. (१४०) *सम्मं मे सव्वभूएसु, वेरं मज्झ न केणइ ।*
खामेमि सव्वजीवे, खमामऽहं सव्वजीवाणं ॥

छा. साम्यं मे सर्वभूतेषु वैरं मम न केनचित् ।
क्षमयामि सर्वजीवान् क्षाम्याम्यहं सर्वजीवानाम् ॥

मू. (१४१) *धीरेणवि मरियव्वं काउरिसेणवि ऽवस्स मरियव्वं ।*
दुण्हंपि य मरणाणं वरं खु धीरत्तणे मरिउं ॥

छा. धीरेणापि मर्त्तव्यं कापुरुषेणापि अवश्यं मर्त्तव्यम् ।
द्वयोरपि मरणयोर्वरमेव धीरत्वेन मर्त्तुम् ॥

मू. (१४२) *एयं पच्चक्खाणं अनुपालेऊण सुविहिओ सम्मं ।*
वेमाणिओ व देवो हविज्ज अहवावि सिज्झिज्जा ॥

छा. एतत्प्रत्याख्यानमनुपाल्य सुविहितः सम्यक् ।
वैमानिको वा देवो भवेत् अथवाऽपि सिद्धयेत् ॥

२६ तृतीयं प्रकीर्णकं महाप्रत्याख्यानं समाप्तम् ।

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता महाप्रत्याख्यान प्रकीर्णकं एवं पूज्यपाद् आनन्दसागरसूरीश्वरेण सम्पादिता संस्कृत छाया परिसमाप्ता ।

***